॥ श्रीहरिः ॥

गीतोक्त संक्षिप्त सूक्ति-संग्रह

जब कोई वाक्य या वाक्यांश अपनी जगहसे अलग कर देनेपर भी सुननेमात्रसे किसी अनुभव, उपदेश आदिका ज्ञान कराता है, तब वह 'सूक्ति' कहलाता है। यद्यपि गीताके सभी श्लोक सूक्तियाँ हैं, तथापि यहाँ उनमेंसे कुछ सूक्तियाँ छाँटकर दी जा रही हैं।

१ 'क्लैब्यं मा स्म गमः' (२। ३)
२ 'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्' (२। ७)
३ 'गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः' (२। ११)
४ 'आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत' (२। १४)
५ 'समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते' (२। १५)
६ 'नासतो विद्यते भावो नाभावो विद्यते सतः' (२। १६)
७ 'अन्तवन्त इमे देहाः' (२।१८)।
८ 'नायं हन्ति न हन्यते' (२। १९)
९ 'न हन्यते हन्यमाने शरीरे' (२। २०)
१० वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥ (२। २२)
११ नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥(२। २३)
१२ 'नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः' (२। २४)
१३ 'जातस्य हि ध्रुवो मृत्युः' (२। २७)
१४ सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥(२। ३८)
१५ 'स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्' (२। ४०)
१६ 'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन' (२। ४७)
१७ 'समत्वं योग उच्यते' (२। ४८)
१८ 'बुद्धिनाशात् प्रणश्यति' (२। ६३)
१९ 'प्रसादे सर्वदुःखानां हानिरस्योपजायते' (२। ६५)
२० 'अशान्तस्य कुतः सुखम्' (२। ६६)
२१ 'या निशा सर्वभूतानां तस्यां जागर्ति संयमी' (२। ६९)
२२ 'स शान्तिमाप्नोति न कामकामी' (२। ७०)
२३ 'निर्ममो निरहंकारः स शान्तिमधिगच्छति' (२। ७१)
२४ 'तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्' (३। २)
२५ 'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्' (३। ५)
२६ 'यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः' (३। ९)
२७ 'परस्परं भावयन्तः श्रेयः परमवाप्स्यथ' (३। ११)
२८ 'भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्' (३। १३)

२९ अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ (३ । १४)
३० एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥ (३ । १६)
३१ 'नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन' (३ । १८)
३२ 'तस्मादसक्तः सततं कार्यं कर्म समाचर' (३ । १९)
३३ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ (३ । २१)
३४ 'अहंकारविमूढात्मा कर्ताहमिति मन्यते' (३ । २७)
३५ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ (३ । २८)
३६ 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः' (३ । ३५)
३७ 'जहि शत्रुं महाबाहो कामरूपं दुरासदम् (३ । ४३)
३८ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ (४ । ७)
३९ परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे-युगे ॥ (४ । ८)
४० 'जन्म कर्म च मे दिव्यम्' (४ । ९)
४१ 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' (४ । ११)
४२ 'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः' (४ । १३)
४३ 'गहना कर्मणो गतिः' (४ । १७)
४४ 'यज्ञायाचरतः कर्म समग्रं प्रविलीयते' (४ । २३)
४५ ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ (४ । २४)
४६ 'यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्' ॥ (४ । ३१)
४७ 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' (४ । ३३)
४८ तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ (४ । ३४)
४९ 'यज्ज्ञात्वा न पुनर्मोहम्' (४ । ३५)
५० 'श्रद्धावाँल्लभते ज्ञानम्' (४ । ३९)
५१ 'संशयात्मा विनश्यति' (४ । ४०)
५२ 'कर्मयोगो विशिष्यते' (५ । २)
५३ 'निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते' (५ । ३)
५४ 'फले सक्तो निबध्यते' (५ । १२)
५५ 'इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः' (५ । १९)

५६ 'ब्रह्मविद् ब्रह्मणि स्थितः' (५। २०)

५७ ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः॥ (५। २२)

५८ भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥ (५। २९)

५९ 'न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन' (६। २)

६० 'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते' (६। ३)

६१ उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥ (६। ५)

६२ 'समबुद्धिर्विशिष्यते' (६। ९)

६३ युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥ (६। १७)

६४ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते॥ (६। २२)

६५ 'तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम्' (६। २३)

६६ शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्॥ (६। २५)

६७ यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति॥ (६। ३०)

६८ आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुःखं स योगी परमो मतः॥ (६। ३२)

६९ 'अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते' (६। ३५)

७० 'न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति' (६। ४०)

७१ 'मत्तः परतरं नान्यत्किञ्चिदस्ति' (७। ७)

७२ 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' (७। १४)

७३ 'वासुदेवः सर्वम्' (७। १९)

७४ 'मद्भक्ता यान्ति मामपि' (७। २३)

७५ 'मामनुस्मर युध्य च' (८। ७)

७६ 'दुःखालयमशाश्वतम्' (८। १५)

७७ 'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' (८। १६)

७८ 'भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते' (८। १९)

७९ 'यं प्राप्य न निवर्तन्ते तद्धाम परमं मम' (८। २१)

८० 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' (९। २१)

८१ 'गतागतं कामकामा लभन्ते' (९ ।२१)

८२ 'योगक्षेमं वहाम्यहम्' (९। २२)

८३ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ (९ । २६)
८४ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ (९ । २७)
८५ 'समोऽहं सर्वभूतेषु' (९ । २९)
८६ अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ (९ । ३०)
८७ क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ (९ । ३१)
८८ 'अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्' (९ । ३३)
८९ 'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु' (९ । ३४; १८ । ६५)
९० 'यज्ञानां जपयज्ञोऽस्मि' (१० । २५)
९१ 'अध्यात्मविद्या विद्यानाम्' (१० । ३२)
९२ यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ॥ (१० । ४१)
९३ 'निमित्तमात्रं भव सव्यसाचिन्' (११ । ३३)
९४ 'नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते' (११ । ३९)
९५ 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' (११ । ४३)
९६ 'ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः' (१२ । ४)
९७ 'त्यागाच्छान्तिरनन्तरम् (१२ । १२)
९८ 'जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्' (१३ । ८)
९९ सर्वतःपाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ (१३ । १३)
१०० 'ज्योतिषामपि तज्ज्योतिः' (१३ । १७)
१०१ 'पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान्' (१३ । २१)
१०२ 'देहेऽस्मिन् पुरुषः परः' (१३ । २२)
१०३ समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥ (१३ । २७)
१०४ 'न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्' (१३ । २८)
१०५ यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥ (१३ । ३०)
१०६ 'शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते' (१३ । ३१)
१०७ ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ (१४ । १८)
१०८ 'ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्' (१५ । १)

१०९ न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ (१५ । ६)
११० 'ममैवांशो जीवलोके' (१५ । ७)
१११ 'विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः' (१५ । १०)
११२ 'सर्वस्य चाहं हृदि संनिविष्टः' (१५ । १५)
११३ 'दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता' (१६ । ५)
११४ 'कामोपभोगपरमा एतावदिति निश्चिताः' (१६ । ११)
११५ त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥(१६ । २१)
११६ 'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ' (१६ । २४)
११७ 'श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः' (१७ । ३)
११८ दातव्यमिति यद्दानं दीयतेऽनुकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ (१७ । २०)
११९ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ (१७ । २८)
१२० 'यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते' (१८ । ११)
१२१ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ॥ (१८ । १७)
१२२ 'यत्तदग्रे विषमिव परिणामेऽमृतोपमम्' (१८ । ३७)
१२३ 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः' (१८ । ४५)
१२४ 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' (१८ । ४६)
१२५ 'सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः' (१८ । ४८)
१२६ 'मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि' (१८ । ५८)
१२७ 'प्रकृतिस्त्वां नियोक्ष्यति' (१८ । ५९)
१२८ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ (१८ । ६१)
१२९ 'तमेव शरणं गच्छ सर्वभावेन भारत' (१८ । ६२)
१३० सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ (१८ । ६६)
१३१ 'नष्टो मोहः स्मृतिर्लब्धा' (१८ । ७३)
१३२ 'करिष्ये वचनं तव' (१८ । ७३)
१३३ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ (१८ । ७८)